## विभाषा चिण्णमुलोः। (६९/२७६८)

चिण् णमुल् इत्येतयोः[1] विभाषा लभेर्नुम् भवति। अलाभि, अलम्भि। लाभंलाभम्, लम्भंलम्भम्। व्यवस्थितविभाषा चेयम्, तेनानुपसृष्टस्य विकल्पः, उपसृष्टस्य नित्यं नुम् भवति। प्रालम्भि। प्रलम्भम्॥

## उगिदचां सर्वनामस्थानेऽधातोः। (७०/३६१)

उगितामङ्गानां धातुवर्जितानाम् अञ्चतेश्च सर्वनामस्थाने [2]परतो नुमागमो भवति। भवतु – भवान्, भवन्तौ, भवन्तः। ईयसुन् – श्रेयान्, श्रेयांसौ, श्रेयांसः[3]। शतृ – पचन्, पचन्तौ, पचन्तः। अञ्चतेः – प्राङ्, प्राञ्चौ, प्राञ्चः[4]। उगिदचाम् इति किम्? दृषद्, दृषदौ, दृषदः[5]। सर्वनामस्थाने इति किम्? भवतः पश्य। श्रेयसः पश्य। अञ्चतिग्रहणं नियमार्थम्, अञ्चतेरेव धातोरन्यस्य मा भूत्। उखास्रत्। पर्णध्वत्। अधातोः इति किम्? अधातुभूतपूर्वस्य यथा स्यात्। गोमन्तमिच्छति गोमत्यति, गोमत्यतेरप्रत्ययः गोमान्। अत्र हि धातुत्वादञ्चतिग्रहणान् न स्यात्॥

## युजेरसमासे। (७१/३७६)

युजे[6]रसमासे सर्वनामस्थाने परतो नुमागमो भवति। युङ्, युञ्जौ, युञ्जः। असमासे इति किम्? अश्वयुक्, अश्वयुजौ, अश्वयुजः। युजेः इति इकारनिर्देशात् 'युज समाधौ' (धा. पा. ११७८) इत्यस्य ग्रहणं न भवति। युजमापन्ना ऋषयः॥

## नपुंसकस्य झलचः। (७२/३१४)

नपुंसकस्य झलन्तस्य अजन्तस्य च सर्वनामस्थाने परतो नुमागमो भवति। उदश्विन्ति। [7]शकृन्ति। यशांसि। [8]पयांसि। अजन्तस्य – कुण्डानि। वनानि। त्रपूणि। [9]जतूनि। नपुंसकस्य इति किम्? [10]अग्निचिद् ब्राह्मणः। झलचः इति किम्? बहुपुरि। [11]बहुधुरि। विमलदिवि। चत्वारि। अहानि। उगितो झलन्तस्य नपुंसकस्य परत्वादनेनैव नुम् भवति। [12]श्रेयांसि। भूयांसि। कुर्वन्ति। कृषन्ति ब्राह्मणकुलानि।

[८२७] बहूर्जि प्रतिषेधो वक्तव्यः। (म. भा. ३.२६५)

बहूर्जि ब्राह्मणकुलानि। अन्त्यात् पूर्वं नुमम् [13]एके इच्छन्ति। बहूर्न्जि ब्राह्मणकुलानि॥

---

1. परतः इत्यधिकम् क, प्रत्यययोः परतः इत्यधिकम् इ. 2. परे क. 3. श्रेयांसम् इत्यधिकम् क. 4. प्राञ्चम् प्राञ्चौ इत्यधिकम् क. 5. दृषदम् दृषदौ इत्यधिकम् क. 6. धातोरङ्गस्य इत्यधिकम् इ. 7. यकृन्ति इ. 8. पयांसि नास्ति ई. 9. जतूनि नास्ति क. दधीनि मधूनि इत्यधिकम् क. 10. अग्निचितो ब्राह्मणाः क. 11. बहुधुरि नास्ति क. 12. यशांसि क. 13. केचित् इ.